# केन्द्रीयसंस्कृतविश्वविद्यालयः

## मुक्तस्वाध्यायपीठम्

## आन्तरिकगुणवत्ताश्वासनकेन्द्रम्

## समीक्षागोष्ठी

### प्रतिवेदनम्

के.सं.वि./मु.स्वा.पी./शै.वि.के./आ.गु.आ.के./2024-25/ दिनाङ्कः – 14/06/2025

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सम्मान्यकुलपतेः आचार्यश्रीनिवासवरखेडिमहोदयस्य आध्यक्ष्ये मुक्तस्वाध्यायपीठस्य समीक्षागोष्ठी 13-06-2025 तमे दिनाङ्के देहल्यां मुखयालये समायोजिता। गोष्ठ्यामस्याम् अधो निर्दिष्टाः सदस्याः समुपस्थिताः आसन् -

1. आचार्यः श्रीनिवासः वरखेडी, कुलतिः, के.सं.वि. (अध्यक्षः)
2. आचार्यः गायत्रीमुरलीकृष्णः, कुलसचिवः, के.सं.वि.
3. आचार्यः मदनमोहन झाः, शैक्षिकविद्यास्थानप्रमुखः, के.सं.वि.
4. श्री सञ्जयकुमारः अगरवालः, वित्ताधिकारी, के.सं.वि.
5. आचार्यः मधुकेश्वरभट्टः, विशेषाधिकारी, के.सं.वि.
6. आचार्यः रत्नमोहनझाः, निदेशकः, मु.स्वा.पी.
7. श्री जनार्दनः ऐयरः, चेन्नै (अन्तर्जालमाध्यमेन) - बाह्यविशेषज्ञः
8. श्री एम्. वि. आर्. शास्त्री, ई-भारतीसम्पत्, बेङ्गलूरु- बाह्यविशेषज्ञः
9. श्री मनीष गोदरा, अमेरिका (अन्तर्जालमाध्यमेन) - बाह्यविशेषज्ञः
10. डा. अनिलकुमारः, सहायकाचार्यः, मु.स्वा.पी.
11. श्री रविशङ्करभट्टः के. एस्., तान्त्रिकप्रबन्धकः, मु.स्वा.पी.
12. श्री गोपालकृष्णः हञ्जारी, तान्त्रिकप्रबन्धकः, मु.स्वा.पी.
13. श्री वेङ्कटेशमूर्तिः, संयुक्तनिदेशकः, मु.स्वा.पी., निदेशकः, आ.गु.आ.के., मु.स्वा.पी.

गोष्ठ्यां चर्चिताः विषयाः निष्कर्षश्च इत्थं वर्तन्ते –

1) अभिनवपाठ्यक्रमाणाम् आरम्भानन्तरम् 2025 वर्षस्य जून्-मासं यावत् मुक्तस्वाध्यायपीठेन साधितप्रगतेः संक्षिप्तं विवरणम् -
   (a) समित्या मुक्तस्वाध्यायपीठस्य उपलब्धिविषयकं विवरणं परिशीलितम्।
2) प्रवेशादारभ्य परीक्षापर्यन्तं मुक्तस्वाध्यायपीठस्य नित्यनैमित्तिककार्याणां निर्वहणाय सज्जीकृतानां सज्जीक्रियमाणानां च तन्त्रांशानां विषयकं चिन्तनम्।

- तन्त्रज्ञानवर्धन-प्रबन्धनादिदृष्ट्या तन्त्रज्ञगणः, प्रचारार्थं प्रचारगणश्च विकसनीयः।
- गतोपवेशने चिन्तितानां विषयाणां (अन्तर्जालस्य 50 mb/s तः 200 mb/s पर्यन्तं वेगवर्धनम्, अतिरिक्त-अन्तर्जालसेवायाः प्राप्तिः, office 365 A3 plan upgrade) क्रियान्वयनं कर्तुं शक्यते।
- Cloud storage क्रयणार्थं GeM पटले प्रयत्नः करणीयः।
- Server Backup निमित्तं Local server क्रेतुं शक्यते।
- छात्राणां साहाय्यार्थं स्वाध्यायवेद्यां AI योजनपुरस्सरं सौकर्यं वर्धनीयम्।
- जालपुटसम्बद्धानाम् अंशानां, तत्र संयोजितव्यवस्थातन्त्रांशानां च गुणवत्ता-सुरक्षा-सौकर्य-जनप्रियतादिविषयेषु मूल्याङ्कनं कृत्वा अपेक्षितव्यवस्थाविषयकपरामर्शं दातुम् अधो निर्दिष्टानाम् उपसमितिः आरचिता –
  1. श्री जनार्दनः ऐयरः
  2. श्री एम्. वि. आर्. शास्त्री
  3. श्री मनीष गोदरा

एते समितिसदस्याः कार्यमिदं यथाशीघ्रं सम्पादयितुं स्वगणे अन्यान् अपि विशेषज्ञान् संयोजयितुम् अर्हन्ति। आवश्यकतानुसारेण अन्तर्जालमाध्यमेन साक्षात् वा परस्परं सम्पर्कः संवादः उपवेशनान्यपि भवितुमर्हन्ति। तदर्थम् अपेक्षित-समुचितपारिश्रमिकादिव्यवस्था अपि विश्वविद्यालयपक्षतः भवेत्। समितिः स्थूलरूपेण समयं निर्धारयेत्।

3) **अध्येतॄणां प्रतिस्पन्दः -**

अध्येतृप्रतिस्पन्दसङ्ग्रहणाय निर्मिता व्यवस्था समित्या परिशीलिता। प्रतिस्पन्दानां विश्लेषणात्मिका सूची अवलोकिता। लब्धाः प्रतिस्पन्दाः उत्साहजनकाः इति अभिप्रेतम्। सर्वान् प्रतिस्पन्दान् पुनः सूक्ष्मतया परिशील्य न्यूनताविषयकपरिष्काराः करणीया इति चिन्तितम्।

4) **स्वाध्यायवेद्याम् अध्येतॄणां कृते कल्पितानि अधो निर्दिष्टसौकर्याणि परिशीलितानि –**

(a) **प्रवेशपरामर्शः**

**समितेः टिप्पणी -** 1568 वैयक्तिकपरामर्शसत्राणि आयोजितानि। सामूहिकपरामर्शसत्रव्यवस्था, विशेषसन्दर्भेषु परामर्शपुरस्सरं तत्क्षणप्रवेशव्यवस्था च कल्पनीया इति चिन्तितम्।

(b) **पाठ्य/पाठ्यक्रमचयनव्यवस्था**

**समितेः टिप्पणी -** छात्रेभ्यः स्वयं वैकल्पिकविषयचयनाय व्यवस्था परिकल्पिता। दक्षिणायनोत्तरायणसत्रयोः तत्तत् सत्रे उपलभ्यमानवैयकल्पिकविषयाणाम् एकपाठ्याध्ययनव्यवस्थायाश्च पृथक् सूची प्रकाशनीया इति चिन्तितम्।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरेषु नियतप्रणाल्याम् अधीयानाः छात्राः स्वपाठ्यक्रमाङ्गत्वेन समानं/तत्तुल्यशिक्षाङ्कयुतं पाठ्यमेकं द्वयं वा मुक्तस्वाध्यायपीठीयं पठन्ति चेत् तदध्ययनप्रमाणाधारेण तस्मिन् पाठ्ये/तयोः पाठ्ययोः नियतकक्ष्यासु उपस्थितेरनिवार्यता न स्यात् इति प्रस्तावः शैक्षिकविद्यास्थानप्रमुखेण उपस्थापितः।

(c) **शुल्कसमर्पणव्यवस्था**

**समितेः टिप्पणी** - केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरेषु नियतप्रणाल्याम् अधीयानाः छात्राः मुक्तस्वाध्यायपीठीयं पाठ्यक्रमं प्रविशन्ति चेत् उपकल्पितां 50% शुल्कापकर्षव्यवस्थाम् उद्दिश्य, विश्वविद्यालयेन तादृशच्छात्रेभ्यः कल्पिताम् अवशिष्टस्य 50% शुल्कप्रत्यर्पणव्यवस्थां च अधिकृत्य छात्राणां सम्यगवगाहनाय सूचना प्रसारणीया।

(d) **प्रदत्तकार्यसमर्पणव्यवस्था**

**समितेः टिप्पणी** - तन्त्रांशस्य प्राथमिकसंस्करणम् अवलोकितम्। तस्य संवर्धनाय अनुशंसा च कृता।

(e) **स्वाध्यायसामग्री**

**समितेः टिप्पणी** - स्वाध्यायवेद्यां स्वाध्यासामग्रीणां स्थापनाय उपकल्पितव्यवस्था अवलोकिता। तत्संवर्धनाय अनुशंसा च कृता। स्वाध्यायसामग्रीणां प्रस्तुतौ मूलभूतांशेषु एकरूपतानिमित्तं, सामग्रीणाम् आकर्षणीयतासंवर्धनार्थं च प्रयासः वर्धनीयः इति चिन्तितम्।

(f) **कक्ष्यायोजना**

**समितेः टिप्पणी** - यद्यपि आहत्य प्रतिस्पन्दः उत्साहजनकः वर्तते तथापि कक्ष्यासञ्चालनसज्जतादिषु प्रत्येकम् अंशे अधिकमवधानं कृत्वा बोधनविधौ स्तरं वर्धयितुं प्रयासः अनुवर्तनीयः इति अभिप्रेतम्।

(g) **सान्दर्भिकसूचनादानम्**

सान्दर्भिकसूचनादानार्थं जालपुटे सूचनाविभागः परिकल्पितः। तत्र दिनाङ्कानुसारेण विषयप्रकारानुसारेण च सूचनाप्रकाशनाय व्यवस्था परिकल्पिता।

**समितेः टिप्पणी** - यद्यपि विषयप्रकारानुसारेण सूचनाः प्रकाश्यन्ते तथापि तत्तद्विषयप्रकारेषु उत्तरोत्तरम् प्रकाशिताभिः सूचनाभिः पूर्वपूर्वतनसूचनाः अधस्थाः भूत्वा न्यूनदृग्गोचरतां यान्ति। एतत्कारणेन कादाचित्करूपेण जालपुटसन्दर्शकाः मुख्यसूचनातः वञ्चिताः भवन्ति इति प्रतिस्पन्दावलोकनेन अवगतम्। अतः सदाप्रकाशनीयप्रमुखसूचनाः अधिककालं सम्बद्धविषयप्रभागेषु यथा दृश्येरन् तथा व्यवस्था कल्पनीया इति चिन्तितम्।

(h) परीक्षा

समितेः टिप्पणी – परीक्षानिर्वहणाय सङ्गणकीयतन्त्रांशः मुक्तस्वाध्यायपीठेन अभिवर्धनीयः इति अनुशंसा कृता। स्वानुकूलपरीक्षासमयचयनसौकर्यं कल्पयितुमपि तन्त्रज्ञानसहकृतव्यवस्था प्रवर्धनीया इत्यपि चिन्तितम्।

5) माननीयकुलपतिमहोदयानाम् अनुमत्या अन्ये विषयाः च

(a) मुक्तस्वाध्यायपीठस्य पाठ्यक्रमेषु पाठनं कुर्वतां बाह्याध्यापकानां मानदेयम् निर्धारणीयम्।

(b) मुक्तस्वाध्यायपीठपक्षतः अन्यूनं 500 अध्येतारः उद्योगं प्राप्नुयुरिति लक्ष्यं साधनीयम्।

(c) परीक्षाविषये मुक्तस्वाध्यायपीठेन अनुभूतसमस्याः तत्परिहारोऽपायाः च चर्चिताः। मुक्तस्वाध्यायपीठं परीक्षानिर्वहणतन्त्रांशं विकासयेत्, तद्द्वारा परीक्षासञ्चालनाय प्रयासः भवेत्।

(d) मुक्तस्वाध्यायपीठस्य अध्येतृभ्यः विश्वविद्यालयस्य आन्तर्जालिकग्रन्थालये प्रवेशः देयः।

(e) मुक्तस्वाध्यायपीठस्य शैक्षिकगतिविधीनां सुचारु सञ्चालनाय अपेक्षितधनराशिप्राप्त्यर्थं प्रस्तावः प्रदेयः।

ईदृशी प्रगतिचिन्तनगोष्ठ्यः अग्रिमेषु मासेषु यथासमयं क्रमशः भवेयुरिति कुलपतिमहोदयस्य परामर्शः सर्वैः स्वागतीकृतः।

निदेशकः (मु.स्वा.पी.)
प्रो. रत्नमोहनझाः
निदेशकः
मुक्तस्वाध्यायपीठम्
(Institute of Open and Distance Education)

निदेशकः (आ.गु.आ.के., मु.स्वा.पी.)
कृ. वेङ्कटेशमूर्ति/K. Venkatesha Moorthy
निदेशकः (आ.गु.आ.के.)/Director (CIQA)
मुक्तस्वाध्यायपीठम्/Mukta SwadhyayaPeetham
शैक्षिकविकासकेन्द्रम्/Academic Development Centre
केन्द्रीयसंस्कृतविश्वविद्यालयः/Central ... University
रा.गा.परिसरः/R.G.Cam...
शृङ्गेरी/Sringeri - 577139 कर्णाटक-राज्यम् /Karnataka

## Mukta Swadhyaya Peetham
**(Institute of Open and Distance Education)**
**Central Sanskrit University**
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi - 110 058

E-mail-msp@csu.co.in

# समीक्षागोष्ठी

दिनाङ्कः – १३/०६/२०२५

चिन्तनबिन्दवः

**Venue : Conference Hall, H.Q. CSU, Janakpuri, New Delhi-110058**

**Date : 13/06/2025 (Friday)** **Time : 11.30 A.M**

| क्र.सं. | अध्यक्ष / समिति सदस्य / सदस्य सचिव | मो.नं. / ई-मेल | हस्ताक्षर |
|---|---|---|---|
| 1. | प्रो. श्रीनिवास वरखेड़ी, कुलपति<br>केन्द्रीय संस्कृत विश्वविद्यालय,<br>नई दिल्ली-58 (अध्यक्ष) | M. :-<br>E-mail :- vc@csu.co.in | [signature] |
| 2. | आचार्यः रा.गा. मुरलीकृष्णः<br>कुलसचिवः (प्र.)<br>केन्द्रीयसंस्कृतविश्वविद्यालयः,<br>56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,<br>नवदेहली-58 (सदस्य) | M. :- 8178041527<br>E-mail :- registrar@csu.co.in | — |
| 3. | श्री एम् वी आर् शास्त्री<br>बेंगलुरु, कर्णाटक<br>(सदस्य) | M. :- 9686999643<br>E-mail :- MVRSASTRY14@GMAIL.COM. | [signature] |
| 4. | आचार्यः मदनमोहनझाः<br>अधिष्ठाता, शैक्षणिकः<br>(सदस्य) | M. :- 9004904059<br>E-mail :- | [signature] |
| 5. | आचार्यः पवनकुमारः<br>परीक्षानियन्त्रकः<br>केन्द्रीयसंस्कृतविश्वविद्यालयः<br>(सदस्य) | M. :-<br>E-mail :- | online |

| | | | |
|---|---|---|---|
| | **Shri Sanjeev Kumar Goyal**<br>वित्त-अधिकारी<br>केन्द्रीयसंस्कृतविश्वविद्यालयः<br>(सदस्य) | M. :- 9891271854<br>E-mail :- fo@csu.co.in | 13/6/25 |
| 7. | **डॉ. मधुकेश्वरभट्टः**<br>विशिष्टकार्याधिकारी,<br>कुलपतिकार्यालयः (सदस्य) | M. :- 9845072827<br>E-mail :- dr.madhumbhat@csu.co.in | |
| 8. | **श्रीमान् कू. वेङ्कटेशमूर्तिः**<br>संयुक्त निदेशकः, मुक्तस्वाध्यायपीठम्,<br>केन्द्रीयसंस्कृतविश्वविद्यालयः (सदस्य) | M. :- 9968403772<br>E-mail :-<br>kuvemoorthy@gmail.com | |
| 9. | **डॉ. अनिलकुमारः**<br>सहायकाचार्यः, मुक्तस्वाध्यायपीठम्<br>शैक्षिकविकासकेन्द्रम्,<br>श्रीराजीवगान्धीपरिसरः, श्रृङ्गेरी-577 139,<br>चिकमङ्गलूरु (कर्णाटकम्) (सदस्य) | M. :- 8790859488<br>E-mail :-<br>anil.lalit22@gmail.com | Anil Kumar |
| 10. | **श्री रविशंकरः भट्टः**<br>Technical Manager (Office Management)<br>(सदस्य) | M. :- 7760234964<br>E-mail :- ravishankarbhatks@msp.ac.in | |
| 11. | **श्री गोपालकृष्णहंगारी**<br>Technical Manager (E-content-Production)<br>(सदस्य) | M. :-<br>E-mail :- | |
| 12. | **डॉ. रत्नमोहनझाः**<br>निदेशकः<br>मुक्तस्वाध्यायपीठम्, केन्द्रीयसंस्कृतविश्वविद्यालयः,<br>56-57, इन्स्टीट्यूशनल एरिया,<br>जनकपुरी, नवदेहली-58 (सदस्य सचिव) | M. :- 9868241551<br>E-mail :-<br>ratnamohanjha@gmail.com | 13.6.2025 |

◆◆◆